# Brahmanaribhih Kritam Krishnanarayana Stotram

# બ્રહ્મનારીભિઃ કૃતં કૃષ્ણનારાયણસ્તોત્રમ્

## Document Information

Text title : Brahmanaribhih Kritam Krishnanarayana Stotram

File name : brahmanArIbhiHkRRitaMkRRiShNanArAyaNastotram.itx

Category : vishhnu, vishnu, lakShmInArAyaNIyasaMhitA, stotra, krishna

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 4 | adhyAya 94/75-90||

Latest update : May 15, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 15, 2026

*sanskritdocuments.org*

# બ્રહ્મનારીભિઃ કૃતં કૃષ્ણનારાયણસ્તોત્રમ્

તથા દેવ્યો બ્રહ્મનાર્યઃ પુપૂજુશ્ચોપદાન્વિતાઃ ।
નૃત્યગીતોત્સવાઁશ્ચક્રુઃ સ્વાવાસે યજ્જનાર્દનઃ ॥ ૭૫॥

સર્વાર્પણં પ્રચક્રુશ્ચ બ્રહ્મેશાય પરાત્મને ।
તુષ્ટુવુઃ શ્રીજયાકાન્તં નરા નાર્યશ્ચ તાપસાઃ ॥ ૭૬॥

“નમઃ સર્વાવતારાણામવતારિન્ પરાત્મને ।
મુક્તાનાં મણ્ડલાવાસાયાઽપિ માનુષવાસિને ॥ ૭૭॥

કૃપાલવે સત્યલોકલાભદાય ચ તે નમઃ ।
નમસ્તાપસદેવાય તપોલોકાગતાય તે ॥ ૭૮॥

નમો મોક્ષપ્રદાત્રે તે નમઃ પિતૃપ્રમોચિને ।
નમોઽનન્તસ્વરૂપાયાનન્તશક્ત્યભિશાલિને ॥ ૭૯॥

નમો બ્રહ્મપ્રિયાકાન્તસ્વરૂપાયાન્તરાત્મને ।
હરિપ્રિયાભિસેવ્યાય બાલકૃષ્ણાય તે નમઃ ॥ ૮૦॥

તપોલોકસ્તપઃપ્રાપ્યસ્તપઃક્ષયે ક્ષયં વ્રજેત્ ।
તાપસાશ્ચ ગતૈશ્વર્યા નશ્યન્તિ ભવસાગરે ॥ ૮૧॥

હરિં વિના ન વૈ મુક્તિઃ સોઽયં ભવાનુપાગતઃ ।
ઉદ્ધારય તપોલોકાત્ સંસારસાગરાદિતઃ ॥ ૮૨॥

પૂર્વેષાં કલ્પકાલાનાં પુણ્યભાજો વયં ત્વિહ ।
કૃપયા નિવસામો હિ યદ્યપિ શ્રીભુજઃ સદા ॥ ૮૩॥

તથાપિ તવ સાન્નિધ્યં પાદયોઃ પૂજનં તુ નઃ ।
કદાપિ પ્રાપ્યતે નૈવ નાવાપ્યેત કૃપાં વિના ॥ ૮૪॥

સ્વર્ગસત્યાન્તલોકાનાં નિવાસિનાં તુ સર્વથા ।
મહાપુણ્યાનિ સન્ત્યેવ કેવલં બન્ધનાનિ હિ ॥ ૮૫॥

નૈવ પુણ્યફલં ભોગમન્તરાન્યત્ પ્રવર્તતે ।
ઇયં તુ કરુણા તેઽત્ર હરે યદ્દર્શનં તવ ॥ ૮૬॥

વરં તુ ભૂતલે જન્મ યત્ર કૃષ્ણો હ્યવાપ્યતે ।
ન દિનં તુ વિના કૃષ્ણં સાક્ષાત્ પૃથ્વીગતં ક્વચિત્ ॥ ૮૭॥

અન્યલોકેષ્વેકવારં સમાયાસ્યતિ ગૌરવાત્ ।
મહાકાર્યનિવહાર્થં સર્વથા દૃશ્યસે ન હિ ॥ ૮૮॥

વરં ભૂતપિશાચાદિજન્મ દેવર્ષિપિતૃતઃ ।
યત્ર ક્વાપિ મિલેન્મુક્તિર્યોગતઃ શ્રીહરેઃ સતામ્ ॥ ૮૯॥

તદદ્ય ભગવાન્ પ્રાપ્તો દયાશેવધિરચ્યુતઃ ।
કુરુ નઃ સર્વથા મોક્ષમર્થયામો વરં ત્વિયમ્ ॥ ૯૦॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાઃ તિષ્યસન્તાનાત્મકસ્ય ચતુર્થખણ્ડે
૯૦-અધ્યાયાન્તર્ગતં બ્રહ્મનારીભિઃ કૃતં કૃષ્ણનારાયણસ્તોત્રં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૪। અધ્યાય ૯૪/૭૫-૯૦॥

lakShmInArAyaNIyasaMhitA . khaNDa 4. adhyAya 94/75-90..

Proofread by PSA Easwaran

*Brahmanaribhih Kritam Krishnanarayana Stotram*

pdf was typeset on May 15, 2026

Please send corrections to *sanskrit@cheerful.com*